दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
अद्य वि.सं. २०८३,
कलियुगाब्धः ५१२७ बसन्त-ऋतुः
सूर्यः उत्तरायणम् चैत्रशुक्ल-द्वादशी
चैत्र 16 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-157 | 1 | मार्च 30, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com



2 हिमाचले 'सर्वाइकल कैंसर' विरुद्धं महाभियानस्य आरम्भः; प्रथमदिने १९७० किशोरीभ्यः 'एचपीवी' (HPV) सूच्यौषधं दत्तम्

3 धर्मशालायां 'आर.एस.एस.' सङ्गोष्ठ्याः आयोजनम्; दत्तात्रेय-होसबाले उक्तवान्- "हिन्दूसमाजं सङ्घटितं, सशक्तं, समर्थं च करोति सङ्घः"

4 रङ्ग्यामहाविद्यालयस्य संस्कृतविभागस्य पञ्चछात्राः स्वप्रतिभया महाविद्यालयस्य गौरवं वर्धितवन्तः


## प्रधानमंत्री-मन की बात-राजनीतिकरणाय सावधानं भवन्तु, किंवदन्तयः राष्ट्रिय हिताय हानिं जनयितुं शक्नुवन्ति




प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत्, पश्चिम एशियायाः संघर्षेण समाह्वान पूर्णसमयः निर्मितः । यतः अयं प्रदेशः भारतस्य ऊर्जा-आवश्यकतानां प्रमुखकेन्द्रम् अस्ति। आकाशवाण्यां स्वस्य मन की बात् इत्यस्मिन् कार्यक्रमे राष्ट्रम् अभिसंबोधयन्, श्रीमोदी दृढविश्वासं प्रकटितवान् यत् राष्ट्रम् कोविड्-19 महामार्याः समये यथा समाह्वानां समापयत् तथैव समापयिष्यति।अस्मिन् काले एककोट्यधिकानां भारतीय-प्रवासिनां कृते सर्वविध-साहाय्यं प्रदत्तं अतः प्रधानमन्त्री गल्फ्-देशान् प्रति कृतज्ञतां प्रकटितवान्। श्रीमोदी अस्य विषयस्य राजनीतिकरणाय सावधानं कृतवान्, किंवदन्तयः राष्ट्रिय हिताय हानिं जनयितुं शक्नुवन्ति। सः जनान्, मिथ्या वार्ताभिः भ्रमितं मा भवितुं, सर्वकारेण दत्तसूचनां प्रति विश्वसितुं च उक्तवान्। मासिककार्यक्रमे, प्रधानमन्त्री मोदी जनसहभागित्वेन भारतस्य समृद्धसांस्कृतिकपरम्परायाः अभिलेखार्थं आयोजिते ज्ञानभारतं सर्वेक्षणस्य विषये उक्तवान्। उपक्रमस्य अस्य उद्देश्यं सम्पूर्ण देशे पाण्डुलिप्याः विषये सूचनां सङ्ग्रहितुम् अस्ति। जून्-मासस्य मध्यभागपर्यन्तं सर्वेक्षणम् अनुवर्तते। सर्वेक्षणेन सर्वेभ्यः स्वस्य परम्परायाः विषये सूचितुं श्रीमोदी आग्रहम् अकरोत्।

राष्ट्रनिर्माणक्षेत्रे यूनः समावेशयितुं माय भारतस्य भूमिकायाः प्रशंसां कुर्वन् प्रधानमन्त्री, विभिन्नेषु उपक्रमेषु महती सहभागिता उदघोषितवान्। सः विकासस्य, कृषकाणां कल्याणस्य, महिलानां नेतृत्वस्य विकासस्य च विषये यूनः योगदानानां प्रशंसाम् अकरोत्। प्रधानमन्त्री जलसंरक्षणविषये अपि उक्तवान्। सः अवदत् यत् देशस्य अनेकेषु भागेषु ग्रीष्मकालस्य आरम्भेन जलसंरक्षणार्थं प्रतिबद्धतां नवीनीकर्तुं समयः आगतः अस्ति।

मन की बात् इत्यस्मिन् कार्यक्रमे प्रधानमन्त्री मोदी अवदत् प्रवासिनां जीवनं परिष्कारयितुं सर्वकारः अनेकान् उपक्रमान् कुर्वन् अस्ति, तान् आत्मनिर्भर भारतस्य दृढः स्तम्भः इति वर्णितवान् । उत्तरप्रदेशस्य वाराणसी-नगरे एकहोरायां एकपञ्चाशत् सहस्राधिक द्विलक्षतोप्यधिकाः वृक्षाः रोपिताः, येन गिन्निस्-वर्ल्ड-अभिलेखः निर्मितः इति उल्लिखितवान्। विंशतिं प्रति विंशति विश्वचषक विजयः, जम्मू-कश्मीरस्य प्रथमः रणजी ट्रोफी-विजयः इत्यादीनां भारतस्य सधैव क्रीडा-उपलब्धीनां प्रशंसां कुर्वन् प्रधानमन्त्री मोदी तेषां निरन्तरप्रयासस्य प्रतिभायाः च परिणामम् इति उक्तवान्।

## भाजपेति दलेन असम-राज्ये अवैध-प्रवासिनाम् आगमनं स्थगितम्-अमितशाहः



भाजपेति दलस्य वरिष्ठः नेता तथा केन्द्रीय गृह-मन्त्री अमितशाहः अवदत् यत्, भाजपेति दलेन असम-राज्ये अवैधप्रवासिनाम् आगमनं स्थगितम्, आगामिषु पञ्चवर्षेषु तेषां निर्वासनार्थं कार्यं करिष्यति। सः अपराले सोनितपुर-जनपदस्य ढेकियाजुल्यां निर्वाचनसमारोहं सम्बोधयन् आसीत्। श्रीशाहः अवदत् यत्, अवैधप्रवासिनां निर्वासनं महत्त्वपूर्णम् अस्ति, ते राज्यस्य मूलनिवासिनां संसाधनेषु पीडनं कुर्वन्ति। भाजपा-सर्वकारस्य उपलब्धयः प्रकाशयन्, श्रीशाहः अवदत् यत्, गतदशवर्षेषु असम-प्रदेशः सामूहिकरूपेण विद्रोहात् मुक्तः अभवत्, येन अस्मिन् प्रदेशे शान्तेः, नूतनानां अवसराणां च आगमनम् अभवत्। सः काङ्ग्रेस-दलं स्वस्य कार्यकाले विधि-व्यवस्थां निर्वोढुं असफलः अभवत् इति आरोपितवान्, यस्य परिणामेन शतशः यूनां प्राणहानिः अभवत् इति सः अवदत्। प्रधानमन्त्रिणः नरेन्द्र मोदिनः नेतृत्वस्य उल्लेखं कुर्वन्, श्रीशाहः अवदत् यत्, अनेकेषु शान्ति-सन्धिषु हस्ताक्षराणि कृतानि, येन अस्मिन् प्रदेशे स्थिरता पुनः आगता। सः अवदत् यत्, प्रायः दशसहस्रं यावत् उग्रवादिभिः स्वशस्त्राणां समर्पणं कृतवन्तः, येन चिरस्थायी शान्तिः आगता। असम-राज्ये भाजपेति दलस्य कार्यकाले कार्यान्विताः विभिन्नाः विकास-कल्याणकारी-उपक्रमाः अपि श्रीशाहेन अधोरेखितम्। भाजपा-दलस्य वरिष्ठः नेता तथा वर्तमानः विधायकः अशोकसिङ्घलः अस्य निर्वाचनक्षेत्रात् नामाङ्कितः अस्ति।

## तेहरान-नगरस्य प्रमुखेषु सैन्य-आश्रयेषु इस्रायलदेशस्य आक्रमणैः,संघर्षः वर्धितः

तेहरान-नगरस्य प्रमुखेषु सैन्य-आश्रयेषु इस्रायलदेशस्य आक्रमणैः, खाति-प्रदेशे च ईरानदेशस्य प्रक्षेपास्त्र-ड्रोन इत्येतयोः आक्रमणैः संघर्षः वर्धितः। इस्राएल-देशेन ईरान देशस्य राजधान्यां तेहरान नगरे सैन्य-संरचनां लक्ष्यीकृत्य आक्रमणानि कृतानि। इस्राएल-देशस्य रक्षाबलैः सामाजिक-माध्यमेन उक्तम् यत् एतेषु आक्रमणेषु ईरान-देशस्य आयुध-भण्डाराणि तथा उत्पादन-केन्द्राणि लक्ष्यीकृतानि। अस्थायी- केंद्रेषु, बैलिस्टिक प्रक्षेपास्त्र-केंद्रेषु, वायु-रक्षा-प्रणालिषु आक्रमणानि सञ्जातानि। वार्तानुसारेण अनेकाः सेनानायकाः निहताः। अस्मिन्नेव क्रमे खाति क्षेत्रे रक्षाबलानि उच्चसतर्कतायां स्थितानि सन्ति, यतः ईरान-देशेन संयुक्त अरब अमीरात, कुवैत तथा बहरीन चेत्यादीनां देशानां उपरि प्रक्षेपणास्त्र-ड्रोन-चोभाभ्यां आक्रमणानि विहितानि। एतानि आक्रमणानि ईरानस्य इस्पात-उद्योगेषु पूर्वं कृतानां अमेरिका-इजरायलयोः आक्रमणानां प्रत्युत्तररूपेण कृतानि ।

## सुभाषितम्

इह भोगं यशः प्रीतिं,
सभासु बहुमान्यता।
दद्यात्परत्र सुगतिं,
विद्याधनमनुत्तमम्।।

भावार्थः- इस संसार में विद्या रूपी धन ही सर्वश्रेष्ठ है क्योंकि उसके माध्यम से सांसारिक सुख, यश, प्रीति तथा विद्वानों की सभाओं में आदर और मान्यता तो प्राप्त होते ही है, जीवन के अन्य क्षेत्रों में भी सफलता और सुख प्राप्त होता है।


हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263



सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः-१७७१११
सङ्केता- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्


## मुख्यन्यायाधीशेन कारगिल-मण्डले नवीन-न्यायालय-परिसरस्य उद्घाटनं कृतम्

मुख्यन्यायाधीशः न्यायमूर्तिः सूर्यकान्तः लद्दाखस्य कारगिल-मण्डले नवीन-मण्डल-न्यायालय-परिसरस्य उद्घाटनं कृतवान्। प्रतिकूल-वातावरणस्य कारणात् परिसरस्य उद्घाटनं लेह-नगरात् आभासी-माध्यमेन (Virtual mode) सम्पन्नम्। अस्मिन् अवसरे न्यायमूर्तिः सूर्यकान्तः अवदत् यत्, "दूरस्थ-क्षेत्रेषु आधुनिक-न्यायिक-अवसंरचनायाः स्थापनायाः भौगोलिक-चुनौतीनां सत्यपि न्याय-प्रणाली सुचारुरूपेण कार्यं करोति।" उद्घाटन-समारोहे लद्दाखस्य उपराज्यपालः विनय कुमार सक्सेना, जम्मू-कश्मीर-लद्दाख-उच्च-न्यायालयस्य मुख्यन्यायाधीशः अरुण पल्ली तथा अन्ये वरिष्ठ-अधिकारिणः उपस्थिताः आसन्।

# हिमाचले 'सर्वाइकल कैंसर' विरुद्धं महाभियानस्य आरम्भः; प्रथमदिने १९७० किशोरीभ्यः 'एचपीवी' (HPV) सूच्यौषधं दत्तम्




**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशे किशोरीः प्राणघातकात् 'सर्वाइकल कैंसर' रोगात् रक्षितुं 'ह्यूमन पैपिलोमा वायरस' (HPV) इति टीकाकरण-अभियानस्य सफलतापूर्वकं शुभारम्भः जातः। प्रदेशस्य ३३३ केन्द्रेषु आयोजितेषु सत्रेषु प्रथमदिने एव १९७० किशोरीणां टीकाकरणं कृतम्। शिमला-नगरे अपि एतत् अभियानं व्यापकस्तरे आरब्धम्। जनपदे स्थापितानां ३९ 'कोल्ड चेन पॉइण्ट' (CCP) माध्यमेन आहत्य २१७ किशोरीभ्यः सूच्यौषधस्य (Vaccine) प्रथम-मात्रा (Dose) दत्ता। यद्यपि जनपदे जायमानया वृष्ट्या प्रतिकूल-ऋतुना च लाभार्थिनां सङ्ख्यायां किञ्चित् प्रभावः जातः, किन्तु स्वास्थ्यविभागस्य कर्मचारिणां तत्परतया कार्याणि सुचारुरूपेण अभवन्।


## के सन्ति पात्र-लाभार्थिनः?

स्वास्थ्यविभागानुसारं अस्य टीकाकरणस्य कृते पात्रता-मानदण्डानुसारं १४ वर्षतः (पूर्णम्) १५ वर्ष-९० दिन-पर्यन्तम् आयुयुक्ताः बालिकाः पात्राः सन्ति। अस्य उद्देश्यं भविष्ये जायमानात् 'सर्वाइकल कैंसर' रोगात् तथा अन्येभ्यः गम्भीर- रोगेभ्यः किशोरीणां सुरक्षा प्रदानं वर्तते।

## आगामि-टीकाकरण-सत्राणां तिथयः

शिमला-जनपदस्य मुख्य-चिकित्सा-अधिकारी (CMO) डॉ. यशपालरांटा महोदयः अस्य अभियानस्य साफलतायै समाजस्य सहयोगं प्रार्थितवान्। सः अभिभावकान्, शिक्षकान्, पञ्चायत- प्रतिनिधीन् च प्रार्थितवान् यत् ते किशोरीः प्रेरयन्तु येन कोऽपि अस्याः सुरक्षायाः वञ्चितः न भवेत्। अभियानस्य आगामि-चरणेषु ५ अप्रैल तथा १२ अप्रैल दिनाङ्कयोः टीकाकरणसत्राणि आयोजयिष्यन्ते। स्वास्थ्यविभागेन परामर्शः दत्तः यत् स्वसमीपस्थं स्वास्थ्यकेन्द्रं गत्वा पात्रतां परीक्ष्य समये टीकाकरणं निश्चितं कुर्वन्तु।

# विपक्षनेतुः जयरामठाकुरस्य मुख्यमन्त्रिणं प्रति तीक्ष्णः वाक्-प्रहारः; उक्तवान्- "छल- कपट- योजनासु निपुणः अस्ति मुख्यमंत्री"



**हिमसंस्कृतवार्ताः- लघ्वीकाशी मण्डी।** पूर्वमुख्यमन्त्री विपक्षनेता च जयरामठाकुरः मुख्यमन्त्रिणं सुखविन्दरसिंहसुक्खू-महोदयम् उद्दिश्य तीक्ष्णं वाक्-प्रहारं कृतवान्। मण्डी-नगरे प्रधानमन्त्रिणः नरेन्द्रमोदिनः मनोगतम् (मन की बात) कार्यक्रमं श्रुत्वा पत्रकारैः सह वार्तालापं कुर्वन् जयरामठाकुरः अवदत् यत् मुख्यमन्त्री सुक्खूः असत्यभाषणे, षड्यन्त्रे, कुचक्ररचनायां च निपुणः अस्ति। एषा वार्ता स्वयं षड्वारं मुख्यमन्त्रीभूतः दिवङ्गतः वीरभद्रसिंहः अपि कथयति स्म। अद्यत्वे काङ्ग्रेस-नेतृवर्गः अपि मुख्यमन्त्रिणः कारणात् दुःखी अस्ति, ते च स्पष्टं वदन्ति यत् तस्य कारणेन काङ्ग्रेस-सर्वकारः न निर्मितः, अपितु तत्र कस्यचित् अन्यस्य एव योगदानम् आसीत्।

**"सत्तापरिवर्तनेन सह बहवः मुखवटाः अपसरिष्यन्ते"**

जयरामठाकुरः अवदत् यत् प्रदेशसर्वकारः पूर्णतया भ्रष्टाचारे निमग्नः अस्ति। यदा सत्तापरिवर्तनं भविष्यति, तदा भ्रष्टाचारस्य सर्वाणि स्तरानि उद्घाटितानि भविष्यन्ति तथा बहवः जनाः निर्वारिताः (बेनकाब) भविष्यन्ति, येषु केचन प्रमुखाः नेतारः अपि सम्मिलिताः सन्ति।

## हिम-केयर (Him Care) योजनाविषये स्पष्टीकरणम्

जयरामठाकुरः 'हिम-केयर' योजनायाः विषये मुख्यमन्त्रिणः पक्षं निराकुर्वन् अवदत् यत् प्रदेशे अस्याः योजनायाः अन्तर्गतं कस्यापि पुरुषस्य गर्भाशयस्य (Hysterectomy) शल्यक्रिया न जाता। मुख्यमन्त्री केवलं मिथ्याभाषणं कृत्वा जनान् दिशाभ्रमितान् करोति तथा सदने भ्रामिकाः सूचनाः ददाति।

असौ अकथयत् यत्- "अयं सर्वकारः भ्रष्टाचारस्य गर्ते अस्ति, समयः आगमिष्यति चेत् सर्वं सत्यं सम्मुखं भविष्यति।"

# HP WEATHER - प्रदेशे एकसप्ताहं यावत् मेघाः वर्षन्ति, एतेषु जनपदेषु करकावृष्टेः नारङ्गसचेतना



**हिमसंस्कृतवार्ताः- शिमला।**
हिमाचलप्रदेशे पुनः एकवारम ऋतुः परिवर्तनं कर्तुं शक्नोति। राज्ये एकसप्ताहं यावत् अधिकांशस्थानेषु वृष्टि-हिमपातयोः पूर्वानुमानं वर्तते। अस्मिन् काले केषुचित् भागेषु तीव्रमरुतः (अंधड़) 'पीचसचेतना' अपि घोषिता अस्ति। अपरपक्षे पञ्चसु जनपदेषु 'करकावृष्टेः' (Hailstorm) 'नारङ्गसचेतना' कृता अस्ति। शिमलानगरे मेघाः आच्छादिताः सन्ति। 'पश्चिमी विक्षोभ' इत्यस्य सक्रियतया ऋतौ एतत् परिवर्तनं जातम्। ऋतुविज्ञानकेन्द्रस्य शिमलायाः पूर्वानुमानानुगुणं २९ मार्चतः ३ अप्रैल पर्यन्तं वृष्टि-हिमपातयोः सम्भावना अस्ति। १ एप्रिल दिनाङ्के उच्चपर्वतीयक्षेत्रेषु अल्पवृष्टिः भविष्यति। २९-३० मार्च, २-३ अप्रैल दिनाङ्केषु राज्यस्य अनेकस्थानेषु मध्यमा वृष्टिः भवितुं शक्नोति। २९-३० मार्च तथा २-३ अप्रैल दिनाङ्केषु ४०-५० किलोमीटर प्रति होरावेगेन प्रचण्डवायुः चलिष्यति इति पीतसचेतना अस्ति। चम्बा, काङ्गड़ा, कुल्लू, मण्डी तथा शिमला जनपदेषु २९ मार्च दिनाङ्के करकावृष्टेः (ओलावृष्टि) आशङ्का वर्तते।

**तापमानस्य स्थितिः-**
अग्रिमेषु ३-४ दिनेषु न्यूनतम-तापमाने २-४ डिग्री सेल्सियस परिमिता गिरावटः (न्यूनता) भवितुं शक्नोति। यद्यपि आगामि-२४ घण्टासु अधिकतम-तापमानं किञ्चित् वर्धिष्यते, किन्तु तदनन्तरं २-३ दिनेषु राज्यस्य अनेकभागेषु अधिकतम-तापमाने ४-६ डिग्री सेल्सियस पर्यन्तं न्यूनता आगमिष्यति।

## हिमाचले वातावरणे परिवर्तनम् 'अटल-कन्दरा- रोहताङ्ग' क्षेत्रे हिमपातः

हिमसंस्कृतवार्ताः- कुल्लूः।हिमाचले पुनः ऋतुपरिवर्तनम् जातमस्ति 'अटल- कन्दरा-रोहताङ्गम्' इत्यस्य समीपे पुनः एकवारं हिमपातः आरब्धः अस्ति। प्रातःकालात् एव कुल्लू-लाहुलस्पीति जनपदयोः ऋतुः परिवर्तितः। दक्षिणद्वारे (South Portal) हिमपातस्य कारणात् पर्यटकाणां गमनं स्थगितम्। प्रातः अष्टवादनात् केवलं 'फोर-बाई-फोर' (4x4) वाहनानां कृते एव अनुमतिः दत्ता। मनालीनगरस्य आरक्षक-उपाधीक्षकः (DSP) के. डी. शर्मा महोदयः सर्वान् प्रार्थितवान् यत् उच्चपर्वतीयक्षेत्रेषु यात्रां न कुर्वन्तु तथा प्रशासनस्य निर्देशाणां पालनं कुर्वन्तु येन दुर्घटनाः न भवेयुः। कुल्लू-जनपदे अपि वृष्टिः जाता।
हिमाचलप्रदेशस्य पञ्चसु जनपदेषु शिमला, मण्डी, कुल्लू, काङ्गड़ा तथा चम्बा- इत्येतेषु प्रचण्डवायोः, करकावृष्टेः (ओलावृष्टि) च 'नारङ्गसचेतना', अन्येषु जनपदेषु पीतसचेतना' (Yellow Alert) अस्ति। 'पश्चिमी विक्षोभ' इत्यस्य प्रभावेण ३ एप्रिल पर्यन्तं प्रदेशे ऋतुः एवमेव भविष्यति।

# धर्मशालायां 'आर.एस.एस.' सङ्गोष्ठ्याः आयोजनम्; दत्तात्रेय-होसबाले उक्तवान्- "हिन्दूसमाजं सङ्घटितं, सशक्तं, समर्थं च करोति सङ्घः"



**हिमसंस्कृतवार्ताः धर्मशाला।** राष्ट्रीयस्वयंसेवकसङ्घस्य काङ्गड़ा-जनपदेन 'होटल डी पोलो' इत्यस्य सभागारे प्रमुखा जनसङ्गोष्ठी आयोजिता। अस्याः गोष्ठ्याः शुभारम्भः 'वन्दे मातरम्' इति गानेन अभवत्। अस्मिन् कार्यक्रमे सङ्घस्य सरकार्यवाहः माननीयः दत्तात्रेय-होसबाले महोदयः मुख्यवक्तृत्वेन उपस्थितः आसीत्।

## सङ्घकार्यस्य शताब्दी-यात्रा

सरकार्यवाहेन उक्तं यत् राष्ट्रियस्वयंसेवकसङ्घः स्वकीयां शतवर्षाणां यात्रां पूर्णां कृतवान् अस्ति। एतेषु १०० वर्षेषु सङ्घः सेवा-समर्पणभावेन राष्ट्रनिर्माणे स्वयोगदानं दत्तवान्। सङ्घ-संस्थापकः डॉ. हेडगेवार महोदयः भारतं स्वतन्त्रं शक्तिशाली च कर्तुं १९२५ तमे वर्षे विजयदशमी-दिने सङ्घकार्यस्य आरम्भं कृतवान्। सङ्घस्य नित्य-शाखाभ्यः देशभक्ति-युक्ताः समाजहितैषिणः च व्यक्तयः निर्मिताः भवन्ति। हिन्दूसमाजं सङ्घटितं समर्थं च कर्तुं सङ्घकार्यं निरन्तरं प्रचलति।

## चरित्रनिर्माणं राष्ट्रिय-आन्दोलनञ्च

होसबाले महोदयः अवदत् यत् सङ्घः सामान्यजनस्य वैयक्तिकचरित्रं तथा राष्ट्रियचरित्रं च परिष्कर्तुं कार्यं करोति।
समाजस्य प्रगत्यै सङ्घटनं, सामूहिक-प्रयासः, सर्वान् सह नीत्वा गमनं च अतीव आवश्यकम् अस्ति।
सङ्घः केवलम् एकं सङ्घटनं नास्ति, अपि तु राष्ट्रिय-आन्दोलनम् अस्ति, स्वयंसेवकानां कृते च इयं एका जीवनशैली वर्तते।
वर्तमानकाले भारतं विश्वस्य अग्रणीषु देशेषु अन्यतमम् अस्ति। सङ्घस्य लक्ष्यं भारतं समरसं, समर्थं, वैभवशालिनं च निर्माणं वर्तते।

## समाधानं सेवाकार्याणि च

गोष्ठ्यां प्रबुद्धजनैः सामाजिक- आर्थिक- राजनैतिक- शिक्षा-संस्कारपक्षेषु तथा सङ्घे महिलानां सहभागिता विषये प्रश्नाः पृष्टाः, येषां समाधानं सरकार्यवाहेन सम्यक् कृतम्। सः सूचितवान् यत्:
> अद्य देशे एकलक्षात् (1,00,000) अधिकाः सेवाप्रकल्पाः चलन्ति।
> तावत्सु एव स्थानेषु शाखा-मिलन-मण्डल्याः च कार्याणि प्रचलन्ति। अस्मिन् कार्यक्रमे सेवानिवृत्ताः सैन्याधिकारिणः, प्रशासकाः, विश्वविद्यालयानाम् आचार्याः, व्यापारमण्डलाध्यक्षाः, प्रसिद्धाः गायकाः, क्रीडकाः, सम्पादकाः, जनप्रतिनिधयः तथा साधु-सन्ताः च उपस्थिताः आसन्।

# अथर्व-कालोनी इत्यस्य नागरिकैः आयोजितः भव्यः नागरी-सत्कार-समारोहः




**जळगांव (प्रतिनिधिःअर्जुन शास्त्री ) :** नगरस्य विकासे महत्त्वपूर्णं योगदानं कुर्वन्तीनां जनप्रतिनिधीनां तथा सामाजिककार्यकर्तॄणां गौरवार्थम् अथर्व-कालोनी-नागरिकैः आयोजितः भव्यः नागरी-सत्कार-समारोहः अत्यन्तं उत्साहपूर्णेन वातावरणेन सम्पन्नः। अस्मिन् समारोहे जळगांव-नगरस्य महापौरा दीपमाळा काले, प्रभाग-संख्या ७ इत्यस्य नगरसेवकः विशाल भोले, नगरसेवकः श्री चंद्रशेखर अत्तरदे, तथा सामाजिककार्यकर्त्री अंकिता पाटील इत्येषां नागरी-सत्कारः कृतः। कार्यक्रमस्य आरम्भः मान्यवराणां हस्तेन दीपप्रज्वलनेन कृतः। "तमसो मा ज्योतिर्गमय" इति मन्त्रोच्चारणेन वातावरणं मंगलमयं जातम्। ततः अनन्तरं प्रमुख-मान्यवराणां पुष्पगुच्छैः स्वागतं कृतम्। आकर्षक-सज्जा, प्रकाश-व्यवस्था च कार्यक्रमस्थले विशेषं शोभां वर्धयामास। अनन्तरं नागरी-सत्कार-समारोहस्य मुख्यः भागः सम्पन्नः। अथर्व-कालोनी-नागरिकाणां वतीनाऽ महापौरा दीपमाळा काले, नगरसेवकः विशाल भोले, नगरसेवकः श्री चंद्रशेखर अत्तरदे तथा अंकिता पाटील एतेषां शालया, श्रीफलेन, पुष्पमालया तथा सम्मानचिह्नेन सत्कारः कृतः। उपस्थित-नागरिकाः तेषां कार्यस्य प्रशंसां कृत्वा करतलध्वनिना सम्मानं प्रकटितवन्तः।
सत्कारस्य प्रत्युत्तरे महापौरा दीपमाळा काले इत्यया नगरस्य सर्वांगीण-विकासाय कृतानां कार्याणां विवेचनं कृतम् तथा भविष्येऽपि नागरिकानां अपेक्षाः पूरयितुं दृढसंकल्पः व्यक्तः। नगरसेवकः विशाल भोले इत्यनेन स्वप्रभागस्य विकासकार्याणि निरूपितानि तथा नागरिकानां सहयोगाय कृतज्ञता प्रकटिता। नगरसेवकः श्री चंद्रशेखर अत्तरदे इत्यनेन अपि नागरिकसेवायाः विषये स्वविचाराः व्यक्ताः तथा समाजहिताय निरन्तरं कार्यं करिष्यामि इति संकल्पः व्यक्तः। सामाजिककार्यकर्त्री अंकिता पाटील इत्यया समाजसेवायाः महत्त्वं वर्णितम् तथा युवानां प्रति सामाजिककार्येषु सहभागितायाः आवाहनं कृतम्। कार्यक्रमे सांस्कृतिक-प्रदर्शनैः वातावरणं अधिकं रमणीयं जातम्। बहुसंख्यकाः नागरिकाः, महिलाः, युवाः तथा सामाजिककार्यकर्तारः उपस्थिताः आसन्।
अस्य कार्यक्रमस्य प्रभावी सूत्रसञ्चालनं मुकुन्द वाणी तथा प्रा. हेमन्त पिंपले इत्याभ्यां कृतम्। तयोः ओजस्विनी शैली कार्यक्रमं अधिकं आकर्षकं कृतवती। अस्य कार्यक्रमस्य मुख्य-आयोजनं श्री सागर पाटील इत्यनेन कृतम्, येन सम्पूर्णस्य कार्यक्रमस्य सुयोग्यं नियोजनं कृत्वा अस्य सफलतां सुनिश्चितवान्। कार्यक्रमस्य सफलतायै सर्वेषां नागरिकानां महत्त्वपूर्णः सहयोगः अभवत्, इति आयोजकैः व्यक्तम्। अन्ते आयोजकानां वतीनाऽ सर्वेषां मान्यवराणां, उपस्थित-नागरिकाणां तथा सहयोगिनां प्रति आभार-प्रदर्शनं कृतम्।
समग्रतः अयं नागरी-सत्कार-समारोहः जळगांव-नगरस्य गौरववर्धकः तथा प्रेरणादायकः अभवत्।

## रेमण्ड-समूहस्य पूर्व-अध्यक्षस्य विजयपत-सिंघानिया-महोदयस्य मुम्बय्यां निधनम्

वस्त्र-व्यापारेण सम्बद्धस्य रेमण्ड-समूहस्य पूर्व-अध्यक्षः विजयपत-सिंघानिया ह्यः मुम्बय्यां दिवङ्गतः। सः सप्ताशीति (87) वर्षीयः आसीत्। तस्य पुत्रः, समूहस्य वर्तमान-अध्यक्षः प्रबन्ध-निदेशकश्च गौतम-सिंघानिया 'सोशल मीडिया' माध्यमेन एतां सूचनां दत्तवान्।
पद्मभूषण-अलङ्करणेन सम्मानितः विजयपत-सिंघानिया एकः कुशलः विमानचालकः (Pilot) अपि आसीत्। सः 'हॉट एयर बैलून' माध्यमेन सर्वाधिकम् उन्नतिं (औन्नत्यं) प्राप्तुं विश्वविक्रमं रचितवान् आसीत्।



# रङ्गियामहाविद्यालयस्य संस्कृतविभागस्य पञ्चछात्राः स्वप्रतिभया महाविद्यालयस्य गौरवं वर्धितवन्तः



रुवीकलिता निहामगर नयनिताकलिता अंकिताशईकीया कौशिककुमारशर्मा

**हिमसंस्कृतवार्ता।** असमराज्यस्य गुवाहाटीविश्वविद्यालयस्यान्तर्गतस्य रङ्गियामहाविद्यालयस्य संस्कृतविभागस्य पञ्चछात्राः स्वप्रतिभया महाविद्यालयस्य गौरवं वर्धितवन्तः। केन्द्रीयसंस्कृतविश्वविद्यालयेन आयोजितायां राष्ट्रस्तरीयायां 'अनलाइन - संस्कृत - ओलम्पियाड्' (२०२५)इति स्पर्धायां भारतीय - ज्ञान - परम्परा (IKS) इति विभागे राज्यस्तरे द्वादशकक्षास्तरे रुवीकलिता इत्यनया १०० अङ्केषु ८६ अङ्कानि प्राप्य प्रथमस्थानं सुवर्णपदकञ्च, निहामगर-नयनिताकलिता इत्यनयोः १०० अङ्केषु क्रमेण ८२ तथा च ७४ अङ्कानि प्राप्य द्वितीयस्थानं रजतपदकञ्च, तथा स्नातकस्तरे अंकिता शईकीयया १०० अङ्केषु ६४ प्राप्य तृतीयस्थानं कंस्यपदकञ्च, तथा स्नातकोत्तरस्तरे कौशिककुमारशर्मणा १०० अङ्केभ्यः ६४ इति प्राप्य तृतीयस्थानं कंस्यपदकञ्च अर्जितवन्तः । १० मार्च २०२५ दिनाङ्के पञ्जीकरणप्रक्रिया, तथा च १२ अगस्त २०२५ दिनाङ्के मुख्यप्रतियोगिता च आयोजिता। स्पर्धायाः मुख्यविषयाः वेदः, साहित्यम्, व्याकरणम्, ज्योतिषञ्च आसन् । एतेषां विषयाणाम् आधारेणेव छात्राणां परीक्षणं कृतम् । इमे छात्राः ६० निमेषाणाम् अल्पसमये एव स्वविद्वत्तायाः परिचयम् अददुः । पुरस्काररूपेण केन्द्रीयसंस्कृतविश्वविद्यालयेन तेभ्यः स्वर्णपदकं, रजतपदकं, कंस्यपदकं, पुस्तिका, लेखनी तथा च एका ई-मानपत्रं प्रदत्तम् ।अस्याः उपलब्धेः कारणेन न केवलं महाविद्यालयस्य संस्कृतविभागः अपि च महाविद्यालयस्याध्यक्षः, सर्वे अध्यापकश्च महान् आनन्दिताः वर्तन्ते। एषा सफलता न केवलम् एतेषां छात्राणां परिश्रमस्य फलम्, अपितु भारतीय - ज्ञान - परम्परायां नूतनयुवावर्गस्य उत्साहस्य रुचेः च दृष्टान्तरूपमपि अस्ति ।

# संस्कृतभारती त्रिपुराप्रान्तस्य प्रान्तसमीक्षायोजनागोष्ठी सम्पन्ना



**नयनज्योतिशर्मा, अगरतला,** त्रिपुराराज्यस्य विशालगडजनपदस्य तपोवन-आश्रमे संस्कृतभारतीत्रिपुराप्रान्तेन 2026 तमवर्षस्य मार्चमासस्य 28,29 दिनाङ्कयोः समायोजिता द्विदिवसीया प्रान्तीयसमीक्षायोजनागोष्ठी। अस्याः संगोष्ठ्याः उद्घाटनकार्यक्रमे मुख्यवक्तृत्वेन समागताः आसन् संस्कृतभारत्याः अखिलभारतीयमहामन्त्रिमहाभागाः श्रीमन्तः सत्यनारायणभट्टवर्याः। अत्र मुख्यातिथिरूपेण आगतवन्तः महाराजावीरविक्रमविश्वविद्यालयस्य कुलपतयः प्रो.विभाषदेवमहाभागाः। अध्यक्षरूपेण विराजमानाः आसन्। अस्य कार्यक्रमस्य सञ्चालनसमितेः अध्यक्षाः तथा आश्रमप्रमुखाः स्वामिनः श्रीमन् सच्चिदानन्दपुरीमहाराजवर्याः। अस्यां गोष्ठ्यां प्रास्ताविकभाषणं तथा स्वागतपरिचयः कृतः प्रान्तमन्त्रिणा डा.अपूर्वशर्ममहोदयेन। अस्यां संगोष्ठ्याम् अखिलभारतस्तरतः समागतः आसीत् अखिलभारतीयमहामन्त्री श्रीमान् सत्यनारायणभट्। क्षेत्रपक्षतः समागतः ईशान्यक्षेत्रीयसङ्घटनमन्त्री श्रीमान् मोहनकन्ननमहोदयः। कार्यक्रमेऽस्मिन् त्रिपुराप्रान्तपक्षतः सप्तप्रान्तीयकार्यकर्तारः समागताः आसन्। त्रिपुराराज्यस्य विभिन्नेभ्यः जनपदेभ्यः चत्वारिंशत्कार्यकर्तारः उपस्थिताः आसन्। तथा च उद्घाटनकार्यक्रमे पञ्चचत्वारिंशत् सामाजिकाः आगत्य उद्घाटनसत्रं साफल्यमण्डितं कृतवन्तः।



# आयाता त्वं हि जीवने मे पुष्पमासनिभा

(Sanskrit Version of Hindi film song-
आये हो मेरी ज़िन्दगी में तुम बाहर वन के")

आयाता त्वं हि जीवने मे पुष्पमासनिभा
आयाता त्वं हि जीवने मे पुष्पमासनिभा
आयाता त्वं हि जीवने मे पुष्पमासनिभा
मम हृदये त्वं नु स्थेयाः,हाय्
मम हृदये त्वं नु स्थेयाः
आहो प्रिया प्रिया भूयाः
आयाता त्वं हि जीवने मे पुष्पमासनिभा
वससि त्वं मे नेत्रे,सहस्रस्वप्नकारा
वससि त्वं मे नेत्रे,सहस्रस्वप्नकारा
मम हृदये त्वं नु स्थेयाः,हाय्
मम हृदये त्वं नु स्थेयाः
आहो प्रिया प्रिया भूयाः
आयाता त्वं हि जीवने मे पुष्पमासनिभा ---- (०१)
नासन् हि कल्यः स्फुटाः,ना रङ्गेणापि दीप्ताः
नासन् हि कल्यः स्फुटाः,ना रङ्गेणापि दीप्ताः
नासीद्धि चपलो वायुः,ना गन्धा हि आमोदाः
आयातो ह्येषः कालः,नु दिव्यप्रमोदानिभः
आयातो ह्येषः कालः,नु दिव्यप्रमोदानिभः
मम हृदये त्वं नु स्थेयाः,हाय्
मम हृदये त्वं नु स्थेयाः
आहो प्रिया प्रिया भूयाः
आयाता त्वं हि जीवने मे पुष्पमासनिभा ---- (०२)
मम अन्तः आस्त शून्यं,शाखातरुविच्छिन्नम्
मम अन्तः आस्त शून्यं,शाखातरुविच्छिन्नम्
अरङ्गोऽभूद्धि होली(उत्सवः),प्रभाहिता दिपाली
(अरङ्ग नैव होली,प्रभाहिता दिपाली)
रिम्झिम् अवर्षः त्वन्नु,वारिप्रवाहधारा
रिम्झिम् अवर्षः त्वन्नु,वारिप्रवाहधारा
मम हृदये त्वं नु स्थेयाः,हाय्
मम हृदये त्वं नु स्थेयाः
आहो प्रिया प्रिया भूयाः
आयाता त्वं हि जीवने मे पुष्पमासनिभा ---- (०३)

**रचयिता - डा. रुरुकुमारमहापात्रः**
**(अध्यापकः)**
**रा. सं. विशवविद्यालयः, तिरुपतिः**

# कलियाचक- विक्रमकिशोर- आदर्शसंस्कृतमहाविद्यालयेन भारतीय- ज्ञान- परम्परायाः सार्वभौमत्वम् इति अखिलभारतीय- शोधसम्मेलनं परिपालितम्





**हिमसंस्कृतवार्ताः- जगदीश डाभी।** केन्द्रीय- संस्कृत- विश्वविद्यालयस्य आर्थिक- सहयोगेन केन्द्रीय- संस्कृत- विश्वविद्यालयानुमोदिते कलियाचक- विक्रमकिशोर- आदर्शसंस्कृतमहाविद्यालये २९.०३.२०२६ तमे दिनाङ्के भारतीयज्ञानपरम्परायाः सार्वभौमत्वम् इति विषयम् आदाय अखिलभारतीयशोधसम्मेलनम् आयोजितम्। शोधसम्मेलनस्य उद्घाटनसत्रे अस्य आदर्शसंस्कृतमहाविद्यालयस्य निर्माणे सहायतां कृतवतीं दानवीराणां विक्रमकिशोरसाउमहाभागानां मूर्तौ, महाविद्यालयस्याद्य अध्यक्षाणां डॉ. नितीशसेनगुप्तमाहशयानां मूर्तौ माल्यार्पणं कृत्वा अनुष्ठानस्य अस्य अतिथयः सभामञ्चम् आरूढवन्तः। तत्र उद्घाटनसत्रे महाविद्यालयस्य छात्राः मङ्गलाचरणेन अतिथयः च सरस्वतीदेव्याः पूजनेन अनुष्ठानस्य सूचनां कृतवन्तः। अनुष्ठानस्य आरम्भे राष्ट्रगीतं, केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलगीतं च सर्वैः आचार्यैः छात्रैश्च गीतम्। अनुष्ठानस्य आरम्भे महाविद्यालयस्य यशस्विनः प्राचार्याः डॉ. व्रजेन्द्रकुमारसिंहदेवमहाभागाः स्वागतभाषणम् अतिथिनां परिचयं सत्कारञ्च कृतवन्तः। अनुष्ठानस्य अस्य सभापतयः आसन् महाविद्यालयस्य अध्यक्षाः, केन्द्रीय- संस्कृत- विश्वविद्यालयस्य प्राक्तनकुलसचिवाश्च प्रो. रञ्जितकुमारवर्मन् महाभागाः, उपस्थिताः आसन् महाविद्यालयस्य प्राक्तन-अध्यक्षाः, पुरीस्थस्य श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य कुलपतिचराः आचार्यकिशोरचन्द्रपाढीमहोदयाः। मुख्यातिथित्वेन आन्तर्जालिकमाध्यमेन समुपस्थिताः आसन् केन्द्रीयसंस्कृतविश्वविद्यालयस्य सदाशिवपरिसरस्य आचार्याः दुर्गाप्रसाद- दासमहापात्रमहाभागाः। पुनः विशिष्टातिथित्वेन नरेन्द्रपुरस्य रामकृष्णमिशन्- आवासिकमहाविद्यालयाद् आगताः आसन् संस्कृतविभागप्रमुखाः डॉ. नारायणदाशमहाभागाः, केन्द्रीयसंस्कृतविश्वविद्यालयस्य सदाशिवपरिसराद् वेदान्तविभागप्रमुखाः प्रो. शम्भुनाथमहालिकमहोदयाः अपि समुपस्थिताः आसन्। एवमेव अस्य महाविद्यालयस्य अध्यक्षचराः डॉ. देवीपदरथमहाभागाः अपि शोधसम्मेलनेऽस्मिन् समुपस्थाय अनुष्ठानस्य अस्य शोभां वर्धितवन्तः। एतान् विशिष्टान् अतिरिच्य देशस्य विविधप्रान्तेभ्यः अनेके विद्वासः साक्षाद् आन्तर्जालिकमाध्यमेन च समुपस्थाय अनुष्ठानम् इदं साफल्यतां प्रापितवन्तः। तेषु डॉ. शान्तनु-अयाचितमहाभागाः, डॉ. नीरजकुमारभार्गव- महाभागाः, डॉ. सुखदेवभट्टमहाभागाः, डॉ. रमेश- दासमहाभागाः, डॉ. राजकिशोरवारिकमहोदयाः, डॉ. निरञ्जनबेहेरा, डॉ. नर-नारायणदासः इत्येते अन्यतमाः। अस्य अखिलभारतीयशोधसम्मेलनस्य समन्वयकाः आसन् महाविद्यालयस्य अद्वैतवेदान्तविभागस्य विभागप्रमुखाः डॉ. दयानन्दपाणिग्राहीमहोदयाः, अनुष्ठानस्य संयोजकाः आसन् व्याकरणविभागस्य मुख्याः डॉ. संकर्षणपण्डामहोदयाः, किञ्च साहित्यविभागस्य अध्यापकाः डॉ. नृसिंहनाथगुरुमहाभागाः। एतेषां मिलितप्रयासेन एव अनुष्ठानमिदं सुष्ठु पूर्णताम् अगात्। अनुष्ठाने अस्मिन् छात्राणाम् अपि महद्योगदानम् आसीत्। तथाहि सार्धैकशताधिकछात्राः अनुसन्धातारः च अनुष्ठाने उपस्थाय अनुष्ठानं साफल्यमण्डितं कृतवन्तः। तत्र साक्षात् महाविद्यालयमागत्य आन्तर्जालिकमाध्यमेन च स्थित्वा षष्ठी छात्राः अध्यापकाश्च शोधपत्रप्रस्तुतिं कृतवन्तः। तत्र आन्तर्जालिकमाध्यमेन सत्रद्वयं चालितम्। ययोः एकस्मिन् सत्रे सत्राध्यक्षरूपेण रामकृष्णमिशन् विवेकानन्द- शैक्षणिक- शोधसंस्थानस्य संस्कृतदर्शनविभागस्य विभागप्रमुखाः डॉ. राकेशदाशमहाभागाः उपस्थिताः आसन्, किञ्च अस्य सत्रस्य सञ्चालकाः आसन् अस्य महाविद्यालयस्य व्याकरणविभागस्य अतिथ्यध्यापकः डॉ. सुखदेवसाउः। अन्यस्मिन् सत्रे सत्राध्यक्षाः आसन् महाविद्यालयस्य आङ्ग्लोऽध्यापकाः डॉ. सञ्जय अग्नहोत्रीमहोदयाः। ये साक्षात्पत्रं प्रस्तुतवन्तः तेषां कृते अपि सत्रद्वयम् आसीत्। प्रथमसत्रे डॉ. अमरेन्द्रकुमारमिश्रमहाभागाः सत्राध्यक्षाः आसन्। तत्र विषयविशेषज्ञत्वेन डॉ. सुरजित् वेनार्जी, डॉ. शान्तनु अयाचितः महोदयः, डॉ. हरिपदवेरामहोदयाश्च। द्वितीये सत्रे सत्राध्यक्षाः आसन् डॉ. शम्भुनाथमहालिकमहोदयाः, विषयविशेषज्ञाः च आसन् डॉ. नीरजकुमारभार्गवमहोदयाः, डॉ. नरनारायणदाशमहोदयाः, डॉ. सुखदेवभट्टमहोदयाश्च। अस्य सत्रस्य सञ्चालकाः आसन् डॉ. नरनारायणदाशमहाभागाः। मध्याह्नभोजनानन्तरमपि शोधच्छात्राणां अध्यापकानां च पत्रवाचनम् अभवत्। अन्ते महाविद्यालस्य आइ. किउ. ए. सि इत्यस्य संयोजकाः महाविद्यालयस्य अधुनिकविभागस्य विभागाध्यक्षाः डॉ. किंशुकसाहामहोदयाः सर्वान् अतिथीन् धन्यवादान् ज्ञापयित्वा अनुष्ठानमिदं सुष्ठु समापितवन्तः।



हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः

## वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। अद्य पुरी-समुद्रतटे सुदर्शन-पट्टनायकेन एका सुन्दरी सिकता- कलाकृतिः रचिता। "भू-होरा"-आचरणम् आरभ्य विंशतिवर्षाणि पूर्णानि जातानि, अतः जनजागरणाय एतत् कार्यं कृतम्।

**नन्दिनी-** एषा कलाकृतिः पर्यावरण-रक्षणाय अतीव उत्तमा अस्ति। किन्तु यन्त्र-जगतः वार्ता तु भिन्ना। चीनदेशे एकस्यां प्रदर्शन्याम् नर्तकेन यन्त्र-मानवेन एकः बालकः कपोले ताडितः। सर्वैः प्रेक्षकैः एतत् भयङ्करं दृश्यं दृष्टम्।

**काव्या-** सुरक्षा-नियमैः विना यन्त्राणि कष्टदानि भवन्ति। चीन-देशे एव अपरः एकः पुरुषः अपि सङ्कटं प्राप्तवान् अस्ति। तेन प्रसिद्धये "सङ्कोचक- बन्धन-मुक्त-क्रीडा" (Zip-tie challenge) कृता। तत्र तेन स्वहस्तौ दृढं बद्धौ, किन्तु पश्चात् सः मुक्तः न जातः। अग्निशामक-दलैः तस्य रक्षणं कृतम्।

**नन्दिनी-** तादृश्यः क्रीडाः कदापि न कर्तव्याः। अन्ते एका भावपूर्णा वार्ता अस्ति। परिचारकाणाम् भविष्य-चिन्तनं प्रति एकेन लेखेन प्रकाशः क्षिप्तः। "मम मृत्योः परं मम आश्रितानां का गतिः भविष्यति" इति चिन्ता अनेकैः वृद्धैः पालकैः कृता। एषा समस्या सर्वैः गम्भीरतया चिन्तनीया।



### ३. धूमापगा (The Smoke/Tobacco)

एकदा अकबरः बीरबलः च अश्वे आरुह्य गच्छन्तः आसन्। मार्गे तम्बाकू-क्षेत्रं (Tobacco field) दृष्ट्वा अकबरः अवदत्— "पश्य बीरबल! तम्बाकू ईदृशं वस्तु अस्ति यत् गर्दभः अपि न खादति।"

(अकबरः बीरबलं पीडयितुं इच्छति स्म यतोहि बीरबलः तम्बाकू खादति स्म)।

बीरबलः तत्क्षणमेव अवदत्— "सत्यं महाराज! ये गर्दभाः सन्ति ते एव तम्बाकू न खादन्ति!"अकबरः निरुत्तरः जातः।